॥ अथ त्र्यंबकीआरंभः ॥

श्रीगणेशायनमः॥ ॥गणाधिपंनमस्कृत्यसत्यकहाद्दिपावकविं।त्र्यंबकेणार्थ
१ बोधायक्रियतेशौचनिर्णयः।अर्थतःशब्दतश्चैवदृष्टपोरुक्तोनदुष्यति।स्फुटबोधा
यबालानांग्रंथोयंरुअतेयतः॥२॥अत्रप्रागुपनयनात्कामचारकामभक्षाइतिगौ
तमोक्तेरनुपनीतस्यपित्रादिसंस्कारंविनाशौचनाधिकारः॥उपनयनोत्तरमपिब्र
ह्मचारिणः॥पित्राद्यंतकर्मकरणएवाशौचाधिकारोनान्यत्र।।तस्माद्द्विजानांसमा
वर्तनोत्तरंनिरंकुशाशौचाधिकारः।।स्त्रीशूद्रयोस्तुविवाहस्यउपनयनस्थानाप
न्नत्वेनविवाहोत्तरमेवशौचाधिकारः।।इतित्र्यंबकीये०प्रथमः॥अथजननाशौचं॥
तत्रगर्भिण्याःमासचतुष्टयपर्यंतंगर्भनाशःस्रावइत्युच्यते।।तद्वागर्भिण्यामासत्रय
पर्यंतंत्रिरात्रंचतुर्थेमासेचतुरात्रमाशौचमस्पृश्यत्वंच।पित्रादिसपिंडानांस्नानमात्रे १
णशुद्धिः।।इतित्र्यंबकीये०द्वितीयोंशः।।गर्भिण्याःपंचमषष्ठमासयोःगर्भना

त्राःपात इत्युच्यते ॥ तत्र गर्भिण्या माससमसंख्यया पंचषट्दिनानि क्रमेणास्य त्र्यपत्तावदे
माशौचं ॥ पित्रादिसापिंडानां तु त्रिरात्रं जननाशौचं ॥ मृताशौचं तु नास्ति ॥ उद्गमेताव
त्पर्यंतं सर्ववर्णसाधारणं वयावस्था निमित्तं चाह ॥ इति श्री० तृतीयोंऽशः ॥ गर्भिण्याः
सप्तममासप्रभृति प्रसवे सर्वेषां मातापित्रादीनां सपिंडानां विप्राणां दशाहं ॥ क्ष
त्रियाणां द्वादशाहं ॥ वैश्यानां पंचदशाहं ॥ शूद्राणां मासं ॥ सच्छूद्रस्य मासार्धं ॥
जननाशौचं ॥ मृताशौचं तु नास्ति ॥ सापत्नमातुः सर्वत्र पितृवत् ॥ इति श्री० चतुर्थों
ऽशः ॥ जननाशौचे गर्भिण्या दशाहमस्पृश्यत्वं ॥ पितुः सापत्नमातुश्च स्नानास्पृ
श्यत्वं ॥ स्नानोत्तरं स्पृश्यत्वमेव ॥ किंतु सर्वसपिंडानां कर्मो नाधिकारमात्रं ॥
तत्रापि नालच्छेदनात्पूर्वं जातकर्मदानादौ पितुरधिकारः ॥ एवं प्रथमषष्ठदश
मदिवसेषु जन्मदाख्यदेवतापूजायां च पितुर्वचनाद्धिकारः ॥ कूटस्थमारभ्य स
प्तपुरुषपर्यंतं सपिंडाः ॥ ततः सप्तसोदकाः ॥ ततः सप्तसगोत्राः ॥ सोदकानां त्रिरा

त्रमाशौचं॥सगोत्राणां स्नानमात्रं। इति त्र्यं॰ पं॰ अंशः॥ गर्भिण्याः दशाहोत्तरं पुत्रो सूतो वि
शति दिनानि कन्यो सूतो मासपर्यंतं कर्मानधिकारः॥ अथ मृताशौचं तत्र तद्दूता मस्पृश्यत्वं कर्मान
धिकारश्चेत्युभयं भवति॥ मृतजाते शिशोः सर्वेषां सापिंडानां दशाहं जननाशौचं मृताशौचं तु नास्ति॥
नालछेदात् पूर्वं शिशोर्मृते मातुर्दशाहं॥ पित्रादि सपिंडानां त्रिरात्रं जननाशौचं। मृताशौचं तु ना
स्ति॥ नालछेदादूर्ध्वं शिशुमरणे दशाहं जननाशौचं सर्वेषां सापिंडानामस्ति मृताशौचं तु नास्ति॥
॥दशाहानंतरं नामकरणात्प्राक् शिशुमरणे स्नानमात्रेण सापिंडानां शुद्धिः॥ मातापि
त्रोस्त्रिरात्रं पुत्रमृतौ। कन्यामृतौ त्वेकाहः॥ नाम्नः पूर्वं खननमेव नित्यं। नोदकदानानि। अलंकर
णं तु सर्वत्र भवति॥ ॥नामकरणोत्तरं वर्षत्रयपर्यंतं दाहखननयोर्विकल्पः॥ नामोत्तरं दंतोत्प
त्तेः प्राक् पुत्रमरणे दाहे सापिंडानामेकाहः॥ खनने तु स्नानाच्छुद्धिः॥ मातापित्रोरुभयत्रापि त्रिरा
त्रं॥ कन्यामृतौ तु त्रिपुरुषसापिंडानामुभयत्रापि स्नानाच्छुद्धिः॥ मातापित्रोरुभयत्रैकाहः॥ २
दंतोत्पत्तेरूर्ध्वं वर्षत्रयपर्यंतं पुत्रमरणे दाहे खनने वा सापिंडानामेकाहः॥ मातापित्रोस्त्रिरात्रं॥

कन्यामृते त्रिपुरुषसपिंडानां स्नानाच्छुद्धिः ॥ मातापित्रोस्त्रिदिनमाशौचं ॥ प्रथमवर्षादूर्ध्वं अकृतचूडस्य
पुत्रस्य मरणे पित्रादिसर्वसपिंडानां त्रिदिनं आशौचं नियतं ॥ दाहश्चानियतः ॥ त्रिवर्षादूर्ध्वं कृतचूडे अकृ
तचूडस्य वा पुत्रस्य मरणे प्रागुपनयनात् पित्रादिसर्वसपिंडानां त्रिदिनमाशौचं । दाह एव । उदकदाना
दि तूष्णीं ॥ कृतचूडस्य मृते पिंडदानं तूष्णीं ॥ कन्याया वर्षत्रयानंतरं वाग्दानात् प्राक्
मरणे त्रिपुरुषसपिंडानामेकाहः । मातापित्रोस्त्रिदिनं दाहोदकदानादि तूष्णीमेव ॥
वाग्दानोत्तरं विवाहात् प्राक् कन्यासु मृतासु भर्तृकुले पितृकुले च सप्तपुरुषसपिंडा
नां पित्रादीनां सर्वेषां त्रिरात्रमाशौचं । दाहोदकदानादि तूष्णीं ॥ पं० १७ उपनयनोत्त
रं मृतस्य पुरुषस्य सर्वेषां सापिंडानां विप्राणां दशाहं । क्षत्रियाणां द्वादशाहं । वैश्यानां
पंचदशाहं । शूद्राणां मासार्धं । सोदकानां त्रिरात्रं । गोत्रजानां स्नानाच्छुद्धिः ॥ ॥ विवा
होर्ध्वं कन्यायाः पितृगृहमरणे मातापित्रोः सोदरभ्रातुश्च त्रिरात्रं ॥ पितृव्यादीनामेकाहः ।
॥ ॥ ऊढायाः कन्यायाः पितृगृहे प्रसवे मातापित्रोस्त्रिरात्रं । सोदरस्य एकरात्रं । पितृ

पंबकी ष्यादिनामेकाहः। इति केचित्॥ ॥ऊढायाः कन्यायाः पतिगृहे मरणे मातापित्रोस्त्रिरात्रं॥ ॥ सां ३
ऊढायाः कन्यायाः पतिगृहे प्रसवे पित्रादिनामशौचं नास्ति॥ ॥मातापित्रोर्मरणे ऊढायाः
कन्यायाः स्त्रिरात्रं। दशाहांतः दशाहोर्ध्वं कालांतरेपि संवत्सरांतेपि पक्षिणी॥ अत्रैवातिक्रां
॥ ३ ॥ ताशौचं ब्राह्मवचनाद्भवति नान्यत्र॥ ॥भ्रातृभगिन्योः परस्परगृहे मरणे परस्परं त्रिरात्रं।
गृहांतरमृतौ तु परस्परं पक्षिणी॥ ॥मातुलमरणे भगिन्यपर्यंते पक्षिणी। उपकारके
मातुलमरणे तु त्रिरात्रं॥ ॥मातुलपत्नीमरणे भर्तृभगिन्यपत्यस्य पक्षिणी॥ ॥उपनीत
भागिनेयमरणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रं। अनुपनीते मृते तु मातामहस्य मातुल
भगिन्यश्च पक्षिणी॥ ॥मातामहमरणे दुहित्रपत्यस्य त्रिरात्रं॥ ॥दौहित्रमरणे मातामहस्य
हस्य मातामह्याश्च त्रिरात्रं। अनुपनीते मृते तु मातामहस्य मातामह्याश्च पक्षिणी॥ ॥माता
मह्यां मृतायां दुहित्रपक्षिणी॥ ॥श्वश्रूश्वशुरयोर्मृतौ सत्यां जामातुः संन्निधौ त्रिरात्रं। अ ॥ ३ ॥
संन्निधौ पक्षिणी। ग्रामांतरे चएकरात्रं॥ ॥जामातरि मृते तु श्वश्रूश्वशुरयोस्स्नानाच्छुद्धिः।
एकाहमाशौचमिति केचित्॥ ॥श्यालके मृते भगिनीभर्तुरेकाहः। श्यालकसुतमरणे स्ना

नमात्रं॥ ॥पितृष्वसरि मृतायांभ्रातृपत्न्यस्य पक्षिणी॥ ॥मातृष्वसरि मृतायां स्वप
त्न्यस्य पक्षिणि॥ ॥आत्मनः पितृष्वसृमातृष्वसृमातुलपुत्राः आत्मबांधवाः। पितुः पितृष्व
सृमातृष्वसृमातुलपुत्राः पितृबांधवाः। मातुः पितृष्वसृमातृष्वसृमातुलपुत्राः मातृबां
धवाः। एते त्रिविधा बांधवा बंधुत्रयं एतेषु मृतेषु पक्षिणी। पितृष्वस्रादिकन्यानां मूढानां
तु मरणे एकाहः॥ ॥दत्तके मृते पूर्वापरपित्रोस्त्रिरात्रं॥ सापिंडानामेकाहः॥ ॥पूर्वा
परपित्रोर्मृतो दत्तकस्य त्रिरात्रं। सापिंडानामेकाहः॥ ॥दत्तकस्य पुत्रपौत्राणां मरणे
जनने वा सापिंडानामेकाहः॥ ॥सपिंडे पुत्रीकृते दत्तके नु मृते सपिंडानां दशाह एव॥ ॥
आचार्यमरणे शिष्यस्य त्रिरात्रं॥ तत्सुत्रपत्न्यो मरणे एकाहः। उपनीयाध्यापक आचार्य इ
त्युच्यते। वेदैकदेशाध्यापक उपाध्यायः। तन्मरणे शिष्यस्यैकरात्रं॥ ॥शिष्यस्य स्वोपनीत
स्य मरणे गुरोस्त्रिरात्रं॥ परोपनीतस्य मरणे तु एकरात्रं॥ ॥सहाध्यायिनो मृतौ एकया
मिणयोरनूचानश्रोत्रिययोर्मृतौ चैकाहः। सांगवेदाध्यायी अनूचानः। वेदमात्राध्यायी
श्रोत्रिय अध्ययनशाब्दार्थस्यार्थज्ञानपर्यवसायित्वं ज्ञात्वा यस्य सिद्धांतः॥ ॥असपिंडस्या
पि श्रोत्रियस्य मैत्र्यासंबंधस्य यद्गृहे मरणं तद्गृहस्वामिन एकरात्रं॥ ॥वानप्रस्थस्य यते

बंधे च मृते युगपत् मृते च सपिंडानां स्नानमात्रं॥ ॥अथातिक्रांताशौचं॥ ॥तत्र जननेति सांब
त्र्यंबकी क्रांताशौचं नास्ति॥ पितुः स्नानं तत्रापि भवति॥ मृतकेपि अनुपनीतमरणादिनिमित्तक
त्रिरात्रादिषु॥ भगिनीमातुलादिमरणनिमित्तत्रिरात्रादिषु च अतिक्रांताशौचं नास्ति॥
॥४॥ किंतु दशाहादि मृताशौचविषयमेव॥ ॥दशाहमध्ये जनने मरणे वा ज्ञाते पुत्रादीनांस
र्वेषां त्र्यहेणैव शुद्धिः॥ संस्कारमपि त्र्यहेणैव समापयेत्॥ अच्छिद्रपर्णशरसंस्कारम
पि त्र्यहेणैव समापयेत्॥ ॥आद्यत्रिरात्रमध्ये समानोदकमरणे ज्ञाते समानोदका
नां त्र्यहेणैव शुद्धिः॥ त्रिरात्रे तिक्रांते तु दशाहमध्ये ज्ञाते पि नाशौचं किंतु स्नानमात्रं कु
र्यात्॥ ॥मातापित्रोर्मरणे दूरदेशे पि वत्सरानंतरमपि श्रवणे पुत्रो दशाहादि पूर्णमे
वाशौचं कुर्यात्॥ ॥स्त्रीपुंसयोः परस्परमरणे परस्परस्य देशांतरे संवत्सरांते पि पूर्णं
दशाहादि भवति॥ ॥सपत्नीषु परस्परमृतौ परस्परस्य देशकालापेक्षं दशाहादि पूर्ण ॥४॥
माशौचं भवति॥ ॥सापत्नमातुर्मरणे संवत्सरोर्ध्वमपि विदेशे पि त्रिरात्रं॥ ॥और
सपुत्र मृते संवत्सरोर्ध्वमपि देशांतरे मातापित्रोस्त्रिरात्रं॥ ॥दशाहोर्ध्वमेकदेशे ज्ञाति मर

णे ज्ञाते मासत्रयपर्यंतं त्रिरात्रं। षण्मासपर्यंतं पक्षिणी। नवमासपर्यंतं एकदिनं तदनंतरं
स्नानमिति वृद्धवसिष्ठः॥ पक्षत्रयपर्यंतं त्रिरात्रं। षण्मासपर्यंतं पक्षिणी। वर्षपर्यंतमेक
रात्रं। तदूर्ध्वं स्नानमिति माधवे देवलः॥ अत्रापि द्विषयत्वेन व्यवस्था॥ ॥दशाहोर्ध्वं देशां
तरे ज्ञातिमरणे ज्ञाते त्रिपक्षपर्यंतं त्रिरात्रं। ततः मासषट्कपर्यंतमहोरात्रं ततो वर्षपर्यंतं दिवा
श्रवणे आसायं रात्रिश्रवणे आप्रातराशौचं॥ वत्सरांते स्नानाच्छुद्धिः। इदमतिक्रांताशौचं
सर्ववर्णसाधारणं। अत्र देशांतरे ज्ञातिमरणे ज्ञाते स्नानाच्छुद्धिः इति केचित्। तन्माधवो
दाहृतविष्णुस्मृत्युक्तस्नानविलसितमिति ज्ञेयं॥ ॥देशांतरं तु विप्रस्य विंशतियोजनो
त्तरं। क्षत्रियस्य चतुर्विंशतियोजनानंतरं। वैश्यस्य सच्छूद्रस्य त्रिंशद्योजनानंतरं। अस
च्छूद्रस्य षष्टियोजनानंतरं ज्ञेयं। पक्षांतराणि तु उक्तपक्षानुसारेणानेतव्यानि॥ ॥
अत्र निष्कर्षः॥ यानि एकगोत्रविषयजननमरणातिक्रांताशौचानि तानि जायापतिभ्या
मुभाभ्यां अविशेषेणानुष्ठेयानि यानि तु पुनर्भगिनीमातुलादिभिन्नगोत्राशौचानि
ते पुंजायापतिमध्ये यस्संबंधं तत्तेनैवानुष्ठेयं नोभाभ्यामिति॥ ॥आहिताग्नेर्मंत्रव
द्दाहदिनमारभ्य पुत्रादिभिराशौचं कार्यं॥ आहिताग्नेः प्रोषितमृते मंत्रवद्दाहात्पूर्वं पुत्रादी

त्र्यं.दी.

५

नामाशौचसंध्यादिकर्मलोपश्च नास्ति॥ ॥अनाहिताग्नेस्तु मरणादिनमारभ्य पुत्रादिभिराशौ
चं कार्यं॥ ॥अथ रात्रौ जनने मरणे वा रात्रिं त्रिभागां कृत्वा आद्यद्वये चेत्पूर्वदिनं तृतीयभागे चेदुत्तर
दिनमारभ्याशौचं कार्यं अर्धरात्रात्प्राक् पूर्वदिनं परतः उत्तरदिनं प्राक् सूर्योदयात्पूर्वदिनमूर्ध्वमुत्तरमिति
पक्षत्रयं देशाचारतो व्यवस्थितः॥ महाराष्ट्रदेशे तु आद्यपक्ष एव प्रचरति॥ ॥अथाशौचसंपातनि
र्णयः॥ तत्र दशाहमृतके दशाहांतर्गतो न्यूनं वा मृतमुपस्थितं भवति॥ तदा पूर्वशेषेण शुद्धिः॥ ॥
दशाहसूतके दशाहांतर्गतो न्यूनं वा सूतकं पतति तदा पूर्वशेषेण शुद्धिः॥ सूतकमध्ये दशाहं न्यूनं वा
मृतकं पतति तदा तस्य पूर्वशेषेण शुद्धिर्नास्ति॥ तत्र सूतकस्यावशिष्टत्वे तु मृतकसमाप्त्या सूत
कमपि समापनीयं॥ ॥महादिरूपमृतके सूतके च दशाहमृतकपाते दशाहसूतकपाते च पू
र्वेण शुद्धिर्नास्ति॥ मृतके सूतकस्य समस्य न्यूनस्य वा संपाते पूर्वेण शुद्धिः॥ अधिकस्यापि सूत
कस्याशुद्धिरिति विवेककाराः॥ ॥पूर्वाशौचमध्ये उत्पन्नमपि पूर्वाशौचोत्तरं ज्ञातं चेत्तदुत्तरमपि
कार्यं॥ ॥दशाहस्य रात्रौ यदि दशाहमाशौचं पतति तदा दिनद्वयं अधिकं कार्यं॥ ॥दशाहास्य रात्रि

त्रिचतुर्थयामे यदि दशाहमाशौचं भवेत्तदा दिनत्रयमधिकं कार्यं ॥ ॥ महायाशौचानां परस्परं रात्रिशे
षसंपाते पूर्वेणैव शुद्धिर्न महादिशुद्धिः ॥ ॥ नवर्धितद्वित्रिसदिनमध्ये आशौचांतरसंपाते चाधिकस्य पू
र्वेण शुद्धिर्नास्ति ॥ समन्यूनयोस्तु पूर्वेण शुद्धिर्भवति ॥ सपिंडाशौचेन मातृपितृभर्तॄणामाशौचं ना
स्ति ॥ मात्राशौचमध्ये पित्राशौचपाते पूर्वशेषेणैव शुद्धिः ॥ पितुः संपूर्णाशौचेन शुद्धिः शेषस्य येषा
शेषपदे संपूर्णलक्षणापत्तिः ॥ पित्राशौचमध्ये मातृमरणे तु पित्राशौचे समाप्य पक्षिणीमधिकां कुर्यात् ॥ इदं दश
मरात्रेर्वाक् भवति दशमरात्र्यां तृतीये त्रिचतुर्थयामे च मातृमरणे तु त्र्यहमहावेव पक्षिणी ॥ ॥ मातुर्भर्त्रा सह
न्वारोहणे तु नाधिका पक्षिणी ॥ ॥ पूर्वाशौचेन शुद्धिः सूतिकायामग्निदे प्रेतपुत्रे सुचनास्ति अत्र प्रेतपुत्रेति पुनर्य
हणं वचनेवानांतरानुरोधेन ॥ ॥ सूतके मृतकपाते पिंडदानप्रतिबंधो नास्ति ॥ मृतके सूतकपाते जातकर्मादि सं
नदानीमाशौचांते वा कुर्यादिति विकल्पः ॥ ॥ मातुर्वाधिका पक्षिणी तन्मध्ये पितुरेकादशाहं श्राद्धं कुर्यात् ॥ ॥
शावस्पर्शे तु दिवा चेन्नक्षत्रदर्शनाच्छुद्धिः ॥ रात्रौ चेत्सूर्यदर्शनात् ॥ तदन्नाशने तद्गृहवासे च यावत्तेषामाशौ
चं तावदाशौचं ॥ संसर्गाशौचे कर्मानधिकारो नास्ति ॥ किंतु स्पर्शत्वमात्रं ॥ तद्ब्राह्मणानामाशौचसंबंधः ॥

स्नेहेनसवर्णानिनिर्हारेतदन्नाशनेतद्गृहवासेचदशाहः॥तदन्नाशनेतद्गृहवासेचद्दशाहः॥तदन्नाशनेतद्गृहवा
सेत्र्यहः॥गृहवासेअन्नभक्षणेनिर्हरणमात्रकृतेचैकाहः॥ ॥क्षत्रियग्रहणंसर्ववर्णनिर्हारेदाहेचतज्जात्याशौ
६ चंदशाहादि॥ ॥विजातीयनिर्हारेविजातीयदाहेचतावजातीयमाशौचं॥क्षत्रियग्रहणंविप्रविजातीयनिर्हार
दाहेचशावजातीयद्विगुणं॥सोदकनिर्हारेदशाहः॥असपिंडालंकरणेअज्ञानादुपवासः॥अशक्तौ
स्नानं॥ज्ञानतःपादकृच्छ्रं॥धर्मार्थमनाथसवर्णनिर्हारक्रियाकरणेन्यदाहेचाद्विजस्यानंतयज्ञ
फलं॥स्नानाच्छुद्धिः॥प्राणायामोग्निस्पर्शश्च॥धर्मार्थमनाथश्चसवर्णनिर्हरणादावपिमा
तुलस्यादिसंबंधेसतित्रिरात्रमाशौचं॥अनुगमनेतुसपिंडेनदोषः॥असपिंडेपिअनाथक्रियायांनदो
षः॥समोत्कृष्टवर्णशवानुगमनेस्नात्वाकृताग्निंस्पृष्ट्वासर्पिःप्राश्यपुनःस्नात्वाप्राणायामंकुर्यात्॥ ६
हीनवर्णशवानुगमनेक्षत्रियेएकाहमाशौचं॥वैश्येपक्षिणी॥शूद्रेत्रिरात्रं॥पूर्ववत्स्नानादिच॥
ब्रह्मचारिणःसपिंडमरणेनाशौचं॥अन्यस्यनिर्हरदाहाद्यौर्ध्वदेहिकेधिकारोनास्ति॥तत्करणेपु

पुनरुपनयनं ॥ कृच्छ्रप्राजापत्ये ॥ ब्रह्मचारिणः पितृमातृआचार्योपाध्यायमातामहनामंत्यकर्मकरणे
दोषोनास्ति ॥ तत्रदत्वा हमस्पृष्टात्वकक्षणमाशौचं ॥ दशादिनं संध्याग्निकार्यादिकर्माधिकारोस्त्येव ॥
एकदिनमस्पृश्यत्वमितिमाधवः ॥ पित्राद्याशौचेपि अशौचिनामन्नं ब्रह्मचारीनभक्षयेत् ॥ भक्षयेपु
नरुपनयनं ॥ ब्रह्मचारिणः पित्राद्यंतकर्माकरणेतु पित्रादिमरणेपि अशौचंनास्ति ॥ समावर्तनोत्त
रं पूर्वमृतानां त्रिदिनमाशौचंनियतमेव ॥ कृतजीवच्छ्राद्धेनाकिमप्याशौचंनकार्यमितिहेमाद्रिः ॥ वा
नप्रस्थस्ययतिपतितेरपिकिमप्याशौचंनकार्यंतेषामपीतरैश्चनकार्यं ॥ परेषांसवर्णानांऔर्ध्व
देहिककरणेतज्जात्याशौचंकृत्वाकृच्छ्रत्रयाच्छुधिः ॥ हीनवर्णौर्ध्वदेहिककरणेतुतत्सवजातीयमाशौ
चंकृत्वाकृच्छ्रत्रयालडैगुण्यत्रैगुण्यचातुर्गुण्यादिप्रायश्चित्तमनुसंधेयं ॥ आहिताग्नेरस्थिदाहे
प्रतिकृतिदाहेवासर्वसापिंडानांदहनाद्याशौचं ॥ अनाहिताग्नेस्तुअस्थिदाहेपर्णशरदाहेचपत्नीपुत्र
योः पूर्वमगृहीताशौचयोः दहनादिपूर्णमेव ॥ गृहीताशौचयोस्तुतयोरपिसंस्कारकालेत्रिरात्रं ॥
पत्निसंस्कारेपसपूर्वंवं ॥ सपत्न्यामिथश्चैवं ॥ अन्यसापिंडानांतुपूर्वमगृहीताशौचानां अनाहि

त्र्यंबकी

ताग्नेस्तु संस्कारकाले त्रिरात्रं ॥ पूर्वगृहीताशौचानां तु सपिंडानां संस्कारकाले स्नानमात्रं ॥ इति त्रिरात्रादि
कं दशाहोर्ध्वं संस्कारकरणे ज्ञेयं ॥ दशाहमध्ये तु शेषदिवसैरेवाशौचसिद्धेरुक्तत्वात् ॥ ॥ रजस्व
८ लायास्तु यस्या विंशतिदिनोत्तरं प्रायशो रजोदर्शनं भवति तस्याः सप्तदशादिनपर्यंतं पुनः रजोदृष्टौ स्ना
नमात्रं ॥ अष्टादशे एकरात्रं ॥ नवदशे द्विदिनं ॥ विंशतिप्रभृति दिनत्रयं ॥ यस्यास्तु विंशतिदिनादर्वाक्
प्रायशो रजोदर्शनं भवति तस्याः दशादिनपर्यंतं स्नानमात्रं ॥ एकादशे एकरात्रं ॥ द्वादशे द्विरात्रं ॥ त्रयोद
शारभ्य त्रिरात्रं ॥ ७ ॥ ७ ॥ अत्र मूलवचनानि माधवादिनिबंधे ज्ञेयं ॥ विस्तरभयाद्बालानां
दुरधिगमत्वान्मया वचनानि लिखितानि ॥ इति श्रीआंगिरसमुद्गलकुलजलधिसुधांशुपदवाक्यप्रमा
णपारावारपारीणयाज्ञिकशिरोरत्ननारायणात्मजरघुनाथसूरिसूनुत्र्यंबकपंडितविरचिताशौ ८
चनिर्णयः समाप्तः ॥ ७ ॥ शके १७४२ खरनामसंवत्सरे चैत्रशुद्धषष्ठ्यां इंदुवासरे चित्रकूटस्थ
ले इदं पुस्तकं समाप्तं ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

॥ इतित्र्यंबकीसमाप्तः॥